विद्युद्दूतः vidyud-dūtaḥ

क्रमाङ्कः तृतीयः

# वसुधैव कुटुम्बकम्

१/१०/२०१२

INTERNATIONAL ASSOCIATION of SANSKRIT STUDIES

Issue: Third

अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

1/10/2012

सी॰ एस्॰ राधाकृष्णेन विरचितानि पद्यानि

## ***श्रीकुचेलवृत्तान्तम्***

सांदीपनिः सद्गुरुरस्य शिष्यौ कुचेलनामास्य सखा तु कृष्णः ।
पूर्वो ऽथ पत्न्या बहुभिश्च पुत्रैः गृहे ऽवसत् त्वल्पधनः सखेदम् ॥१॥
स एकदा प्राणसखं वरिष्ठं श्रीद्वारकेशं सुसमृद्धियुक्तम् ।
श्रीरुक्मिणीसंयुतमात्मबन्धुं सस्मार विप्रः हृदये स्वकीये ॥२॥
किं कृष्णमद्याहमवाप्य याचे वित्तैर्विहीनं कृपयोद्धरेति ।
कुटुम्बधूर्निर्वहणे त्वशक्तं विधेर् विपाको बृहती दरिद्रता ॥३॥
ततः कथञ्चित् परिकल्प्य धैर्यं शङ्काकुलो नष्टबलः कुचेलः ।
विवेश स कृष्णपुरीं च पश्यन् प्रासादमालाभिरथोज्ज्वलन्तीम् ॥४॥
किं वा जनो वक्ष्यति मामिहस्थः दारिद्र्यदग्धं ह्यथ जीर्णवस्त्रम् ।
कार्पण्यचिन्ताभरितो यतात्मा शनैः शनैः कृष्णसभामवाप ॥५॥
द्वारि स्थिताभ्यां परिहासवाग्भिः भो वृद्धराट् किं तव राजकार्यम् ।
एवं भृशं वारितसुप्रवेशः कर्तव्यतामूढ इव स्थितो ऽसौ ॥६॥
नीतश्च कृष्णेन ततो विनीतः द्वारात् सभाया अथ मध्यभागम् ।
ह्नियान्वितः स्वीकृतवान् सपर्यां आतिथ्ययोग्यां नयने निमील्य ॥७॥
सखे कुचेल क्रियते ऽद्य सत्क्रिया भवान् पुनर्मित्रवरो ऽतिथिश्च नः ।
कालं कियन्तं खलु नीतवानहं विना भवद्दर्शनमात्मबन्धो ॥८॥
कृष्णस्य निर्बन्धतयोपविश्य सिंहासने रत्नमये च विप्रः ।
जग्राह कृष्णेन कृतां सपर्यां ह्निया च भक्त्या च धियात्मतुष्ट्या ॥९॥
पृष्टः तदा तेन सुकौशलं क्रमात् स्वकीयवृत्तान्तमहं कथं वा ।
वदामि चास्मै इति रूढशङ्कः तूष्णीं स्थितो ऽसौ निभृतो कुचेलः ॥१०॥
सहोदरी मे भवतस्तु पत्नी मह्यं प्रियं किञ्चिदुपाददात् किम् ।
इत्युक्तिपूर्वं प्रसभं कुचेलात् कुचेलबद्धं पृथुकं विधृत्य ॥११॥

एकैकमुष्टिं स्वमुखे न्यषिञ्चद् यदा यदास्वादनतत्परो हरिः ।
तदा तदा संववृधे विभूतिः कुचेलगेहे च कुबेरतुल्या ।।१२।।
हरिप्रिया पार्श्वगता च रुक्मिणी एवं प्रभो भुक्तमिदं ह्यलं भोः ।
उवाच सा त्वत्कृतकर्मणासौ भोक्ता धनस्याथ सुखस्य जातः ।।१३।।
आमन्त्र्य कृष्णं सुचिराच्च दृष्टं अदृष्टपात्रं विरराम भूत्वा ।
स्थानं प्रविष्टः निजवासभूतं स्मरन् हरिं बाल्यसखं क्षितीशम् ।।१४।।

वासस्थानं परिणतमहो कुट्टिमं गोपुरं भोः
भार्या पुत्रैः सह सुवसना क्रीडति प्रीतिपूर्वम् ।
एतद् गेहं मम किमपरं वेति संशीतियुक्तः
पश्चाज् ज्ञात्वा ससुखमवसत् श्रीहरेर्दिव्यलीलाम् ।।१५।।
एतद्भक्त्या खण्डकाव्यं पठित्वा वैकुण्ठाख्यं मुक्तिलोकं लभन्ते ।
जन्मन्यस्मिन् वीतदारिद्र्यदुःखाः सन्तः हृद्यं श्रीकुचेलस्य वृत्तम् ।।१६।।

---

गीर्वाणाङ्गणशाखिकल्पितनवं विद्यापरागैर्युतं
विद्युद्दूतमिति प्रसूनमनघं वर्णप्रभापूरितम् ।
विद्युन्माध्यमनित्यनूतनपथा संवर्ष्य वार्तामृतम्
जीयात्सज्जनमानसेषु परमं मोदं वितन्वच्चिरम् ॥

*शोधच्छात्रया प्रेमलतया विरचितं पद्यम्*

---

इति विद्युद्दूतस्य तृतीयाङ्कः

---